# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2019

## SANACOR06T-SANSKRIT (CC6)

### POETICS AND LITERARY CRITICISM

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

#### क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) साहित्यदर्पणानुसारं महाकाव्यस्य लक्षणं वैशद्येन विवृणुत।

(ख) कथाकाव्यस्य किं लक्षणम् ? कथाख्यायिकयोः वैसादृश्यं साहित्यदर्पणानुसारं प्रतिपाद्यताम्।

(ग) चम्पूकाव्यस्य किं लक्षणम् ? चम्पूकाव्यस्य एकमुदाहरणं प्रदाय तत्र लक्षणसङ्गतिं साधयत।

#### ख-विभागः

2. अधोनिर्दिष्टेषु प्रश्नेषु यथेच्छमेकः प्रश्नः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 10×1 = 10

(क) का नाम लक्षणा ? काव्यप्रकाशानुसारं शुद्धलक्षणायाः भेदमुदाहरणं च समासेन विवृणुत।

(ख) कः उत्पत्तिवादस्य प्रवर्तकः ? काव्यप्रकाशानुसारं सोदाहरणमुत्त्पत्तिवादं लिखत।

(ग) अनुमितिवादस्य कः प्रवर्तकः ? अनुमितिवादेन सह उत्पत्तिवादस्य सादृश्यं वैसादृश्यं च व्याख्यायताम्।

#### ग-विभागः

3. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) अलंकारशब्दस्य कोऽर्थः ? मुख्यतोऽस्य कति विभागाः सन्ति ?

(ख) उपमालंकारस्य किं लक्षणम् ? अस्य एकमुदाहरणं प्रदीयताम्।

(ग) को नाम श्लेषालङ्कारः ? अस्य कति भेदाः सन्ति ?

(घ) उत्प्रेक्षालंकारे 'सम्भावना' शब्दस्य कोऽर्थः ?

(ङ) छन्दोमञ्जरीग्रन्थस्य रचयिता कः ? छन्दः कतिविधम् ?

(च) उपजातिछन्दसि कति अक्षराणि सन्ति ? अस्य छन्दसः किं लक्षणम् ?

(छ) मन्दाक्रान्ताछन्दसि कुत्र कुत्र यतिर्भवति ? एकमुदाहरणं प्रदीयताम्।

#### घ-विभागः

4. अधोलिखितेषु चतुर्णां संस्कृतेन देवनागरीलिप्या च उत्तरं लेख्यम् – 5×4 = 20

(क) इन्द्रवज्रा – इति छन्दसः लक्षणंमुदाहरणं च दीयताम्।

(ख) यमकः – इत्यस्य लक्षणमुदाहरणं च दीयताम्।

(ग) मालिनी – इति छन्दसः लक्षणंमुदाहरणं च लिख्यताम्।

(घ) वद तोटकमब्धि सकारयुतम् – व्याख्या कार्या।

(ङ) उपेन्द्रवज्रा प्रथमे लघौ सा – व्याख्या कार्या।

(च) साम्यं वाच्यमवैधर्म्यं वाक्यैक उपमाद्वयोः – व्याख्या कार्या।

——×——